[२५२] डप्रकरणे सर्वत्रपन्नयोरुपसङ्ख्यानम्[1]। (म. भा. २.१०३)

सर्वत्रगः। [2]पन्नगः।

[२५३] उरसो लोपश्च। (म. भा. २.१०३)

उरसा गच्छति इति उरगः।

[२५४] सुदुरोरधिकरणे। (म. भा. २.१०३)

सुखेन गच्छत्यस्मिन् इति सुगः। दुर्गः।

[२५५] [3]निरो देशे।

निर्गो देशः। अपर आह–

[२५६] डप्रकरणे[4]ऽन्येष्वपि दृश्यते इति[5]। (म. भा. २.१०३)

स्त्र्यगारगः। ग्रामगः। गुरुतल्पगः॥

## आशिषि हनः। (४९/२९६६)

ड इति वर्तते। आशिषि गम्यमानायां हन्तेर्धातोः [6]कर्मण्युपपदे डप्रत्ययो भवति। तिमिं वध्यात् तिमिहः। [7]शत्रुहः। [8]आशिषि इति किम्? शत्रुघातः।

[२५७] दारावाहनोऽणन्तस्य च टः सञ्ज्ञायाम्। (म. भा. २.१०३)

[9]दारावुपपदे आङ्पूर्वाद् हन्तेः[10] अण् प्रत्ययो भवति, अन्तस्य च ट[11]कारादेशो भवति, सञ्ज्ञायां विषये। [12]दारु आहन्ति दार्वाघाटः।

[२५८] चारौ वा[13]। (म. भा. २.१०३)

आङ्पूर्वात् हन्तेश्चारावुपपदे अण्, [14]अन्तस्य वा टकारादेशः। चार्वाघाटः, चार्वाघातः।

[२५९] कर्मणि समि च। (म. भा. २.१०३)

कर्मण्युपपदे [15]सम्पूर्वात् हन्तेः धातोः [16]अण् प्रत्ययो भवति, अन्तस्य च वा टकारादेशः। वर्णान् [17]संहन्ति [18]वर्णसङ्घाटः, वर्णसङ्घातः। [19]पदानि संहन्ति पदसङ्घाटः, पदसङ्घातः॥

---

1. वक्तव्यम् इत्यधिकम् फ. 2. पन्नं गच्छति इत्यधिकम् अ, पन्नः गच्छति इत्यधिकम् ह. 3. निसो देशे अ. ह. ड. भाष्ये. अष्टाध्यायीसूत्रपाठे (मद्रास) 4. अन्यत्र फ. पमं, अत्रापि क. 5. वक्तव्यम् इत्यधिकम् फ. 6. डप्रत्ययो भवति कर्मण्युपपदे फ. 7. शत्रुं वध्यात् इति इत्यधिकम् फ. 8. आशिषि-किम् नास्ति ड.ह. 9. दारा उपपदे ह. 10. धातोः इत्यधिकम् ह. 11. टकार आदेशः ह. 12. दार्वा आहन्ति ह. 13. तस्य च टकारः इत्यधिकम् ड. 14. अन्तस्य नास्ति ह. 15. सम्पूर्वस्य ह. 16. अण्प्रत्ययो नास्ति ह. 17. संहरन्ति इति ह. 18. वर्णसंघाटः नास्ति ह. 19. उदाहरणमिदं नास्ति ह.